# ॥ गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं
प॑श्येमा॒क्षभि॒र्यज॑त्राः । स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳ
स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।
स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा
वि॒श्ववे॑दाः । स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒
बृह॒स्पति॑र्दधातु ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ नम॑स्ते ग॒णप॑तये । त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि ।
त्वमे॒व के॒वलं॒ कर्ता॑सि । त्वमे॒व के॒वलं॒
धर्ता॑सि । त्वमे॒व के॒वलं॒ ह॒र्ता॑सि । त्वमेव सर्वं॑
खल्विदं॑ ब्रह्मा॒सि । त्वं साक्षादात्मा॑सि नि॒त्यम् ॥ १॥

ऋ॒तं व॑च्मि । स॒त्यं व॑च्मि ॥ २॥
अव॑ त्वं॒ माम् ।
अव॑ व॒क्तारम्॑ । अव॑ श्रो॒तारम्॑ । अव॑ दा॒तारम्॑ ।
अव॑ धा॒तारम्॑ । अवानूचानम॑व शि॒ष्यम् । अव॑
प॒श्चात्ता॑त् । अव॑ पु॒रस्ता॑त् । अवो॒त्तरात्ता॑त् । अव॑
द॒क्षिणात्ता॑त् । अव॑ चो॒र्ध्वात्ता॑त् । अवाध॒रात्ता॑त् ।
सर्वतो मां पाहि पाहि॑ सम॒न्तात् ॥ ३॥
त्वं वाङ्मयस्त्वं॑
चिन्म॒यः । त्वमानन्दमयस्त्वं॑ ब्रह्म॒मयः । त्वं
सच्चिदानन्दाद्वि॑तीयो॒ऽसि । त्वं प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वं ज्ञानमयो विज्ञान॑मयो॒ऽसि ॥ ४॥
सर्वं॑ जगदिदं
त्व॑त्तो जा॒यते । सर्वं॑ जगदिदं त्व॑त्तस्ति॒ष्ठति ।
सर्वं॑ जगदिदं त्वयि ल॑यमे॒ष्यति । सर्वं॑ जगदिदं
त्वयि॑ प्रत्ये॑ति । त्वं भूमिरापोऽनलोऽनि॑लो न॒भः ।
त्वं चत्वारि वा॑क्पदा॒नि ॥ ५॥
त्वं गु॒णत्र॑याती॒तः ।
त्वं अवस्थात्र॑याती॒तः । त्वं देह॒त्र॑याती॒तः । त्वं

कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं
शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं
ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं
सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६॥

गणादिं पूर्वमुच्चार्य वर्णादिंस्तदनन्तरम् ।
अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेण ऋद्धम् ।
एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् ।
अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।
बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः ।
सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्री
छन्दः । श्रीमहागणपतिर्देवता । ॐ गं गणपतये नमः ॥ ७॥
एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ ८॥
एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं
च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः
पुरुषात्परम् । एवं ध्यायति यो नित्यं
स योगी योगिनां वरः ॥ ९॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदराय
एकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ १०॥
एतदथर्वशीर्षं योऽधीते । स
ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते ।
स सर्वतः सुखमेधते । स पञ्चमहापापात्
प्रमुच्यते । सायमधीयानो दिवसकृतं
पापं नाशयति । प्रातरधीयानो रात्रिकृतं
पापं नाशयति । सायं प्रातः प्रयुञ्जानः
पापोऽपापो भवति । धर्मार्थकाममोक्षं च विन्दति ।
इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्
दास्यति । स पापीयान् भवति । सहस्रावर्तनाद्यं
यं काममधीते । तं तमनेन साधयेत् ॥ ११॥

अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति ।

चतुर्थ्यामनश्नन् जपति । स विद्यावान् भवति ।
इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यान्न
बिभेति कदाचनेति ॥ १२ ॥
यो दूर्वाङ्कुरैर्यजति । स
वैश्रवणोपमो भवति । यो लाजैर्यजति । स यशोवान्
भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति ।
स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति ।
स सर्वं लभते स सर्वं लभते ॥ १३ ॥
अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा । सूर्यवर्चस्वी भवति ।
सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा ।
सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते ।
महादोषात् प्रमुच्यते । महापापात्
प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स
सर्वविद्भवति स सर्वविद्भवति । य एवं वेद ।
इत्युपनिषत् ॥ १४ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳ
सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा
विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो
बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Encoded by Sunder Hattangadi sunderh@hotmail.com
without Vedic accents (Svaras.) The accents and
re-proofreading by Kirk Wortman kirkwort@hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated January 16, 2004